# सन्देशः



“भरतखण्डस्य किमैश्वर्यमिति पृष्टं चेत् संस्कृतमित्येव वदेयमित्यत्र न संशयलेशोऽपि नाम” । अस्माकं प्रधानमन्त्रिणः श्रीमतः जवाहरलाल्महोदयस्य वचनमिदम् । एतादृशम् ऐμार्यं मूलतः अस्मदीयमिति स्मरणमेव अस्मासु रोमाञ्चं जनयति । एतादृशसम्पत्तेः संरक्षणार्थं संवर्धनार्थं च संस्कृतप्रियैः चिरादपेक्षितः कर्णाटकसंस्कृतविश्वविद्यालयः स्थापितः, तथा तद्द्वारा इदानीं त्रैमासिकं वार्तापत्रमपि प्रकाश्यमानमस्तीति महान् प्रमोदविषयः ।

संस्कृतज्ञाः सर्वे जानन्ति यत् अस्मिन् क्षेत्रे वेदोपनिषत्कालादारभ्य अद्यावधि अनेकाः स्त्रियः कीदृशसेवाः कृतवत्यः इति । अद्यापि तादृश्यः सुज्ञाताः अज्ञाताश्च नार्यः गीर्वाणवाण्याः सेवां कुर्वत्यः सन्ति । इदानीं ताः अस्मिन् महत्कार्ये इतोऽप्यधिकं तल्लीनाः भूत्वा सेवापराः भवन्तु इति संस्कृताभिमानिनां सर्वेषाम् अस्माकमाशयः ।

**– विदुषी एन्. आर्. गिरिजाम्बा**
**चामराजपेटे, बेङ्गलूरु**